This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥

श्रीगणेशायनमः॥

श्रीघतमजरी

१२०

१५

न्याय सिद्धान्तमंजरी

कर्ता – जानकीनाथ

पत्र २५

Accession No.:- ~~[illegible]~~ ~~9924~~ M1219

Title:- ~~[illegible]~~ न्यायसिद्धान्तमञ्जरी

Author:- जानकीनाथ

पत्र:- (26)

K K S U LIBRARY
RAMTEK
441 106
M. 1219
Dist Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री

प॰

सि॰ सं॰ ॥श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥श्रीदक्षिणामूर्त्तयेनमः॥प्रणम्यपरमात्मानंजानकी
नाथशर्म्मणा॥क्रियतेयुक्तिमुक्तावलिन्यायसिद्धान्तमञ्जरी॥१॥इह किलनिखिलतो
कविमोक्षमुख्योपायंमननोपायमात्मनस्तत्वज्ञानमामनंति॥तच्चप्रमाणाधीनमिति
प्रमाणंनिरूप्यते॥तत्रप्रमायाःकरणंप्रमाणं॥प्रमातुयथार्थानुभवः॥तदाहुराचार्याः
॥यथार्थानुभवोमानमिति॥ननुकिमिदंयाथार्थ्यं किंचानुभवत्वं॥उच्यते॥तद्वतितत्प्रकारकत्व
गाहित्वंयाथार्थ्यं॥भवतिहिरजते इदंरजतमितिज्ञानंरजतत्ववतिरजतत्वावगाहीति
ति २ यथार्थं॥शुक्ताविदंरजतमितिज्ञानंचनरजतत्ववतिरजतत्वावगाहीतिनयथार्थं॥नन्वेवंरज
ते इदंरजतंनवेतिसंशयोपिप्रमास्यादितिचेन्न॥रजतत्वांशेप्रमेव॥नह्वतितत्त्वेनुभ
वत्वंप्रमेतिहिप्रामाणिकाः॥ननुशाखावच्छेदेनकपिसंयोगवतिवृक्षेमूलेवृक्षःकपि

राम॰
९

संयोगीतिप्रत्ययोपिप्रमास्यात्॥कपिसंयोगाभाववतिवृक्षेतत्प्रकारावगाहित्वादितिचेन्न॥वृक्षे
कपिसंयोगप्रतीतिःप्रमैव॥मूलेवच्छेदकत्वप्रत्ययस्तुनतथा॥तस्यातद्वनवच्छेदक
त्वात्॥स्मृतिभिन्नज्ञानत्वमनुभवत्वं॥जातिविशेषोवा॥अनुभवामीत्यनुगतप्र
तीतेर्बाधकविनाजातिविषयकत्वात्॥करणत्वं चव्यापारवदसाधारणकारणत्वं॥घ
टंप्रतिकपालद्वयसंयोगवारणायव्यापारवदिति॥ईश्वरज्ञानवारणायअसाधारणे
ति॥नन्वेवंज्ञानमात्रंप्रतिआत्मनोपिकरणत्वंस्यात्॥आत्ममनःसंयोगस्यव्यापारस्य
सत्वात्॥तज्जन्यस्तज्जन्यजनकोवात्रव्यापारः॥भवतिहिसंयोगआत्मजन्यआत्मज
न्यज्ञानजनकश्चेतिचेन्न॥स्यादेव॥करणत्वादीनामुपाधीनांभेदाच्चव्यवहारभेदः॥
अतएवविवक्षातःकारकविभक्तयोनानाभवंतीतिशाब्दिकाः॥अतएवआ
त्मनमात्मनावेत्सीतिप्रतीयते॥शिवादित्यमिश्रास्तु॥करणाद्याकारानुगतप्रतीतेः
त्वेसति ५ प्रतीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सि०म० करणत्वादिकमखण्डोपाधिरूपसामान्यमङ्गीचक्रुः॥ तच्च प्रमाणं चतुर्विधमित्याह भगवा
२ न्सूत्रकारः॥ प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि॥ तत्र साक्षात्काररूपप्रमाकरणं प्रत्यक्षं॥
साक्षात्कारत्वं च साक्षात्करोमीत्यनुगतप्रतीतिसाक्षिको जातिविशेषः॥ न चैयमिन्द्रि
यजन्यज्ञान विषया॥ ज्ञानमात्रस्य मनोरूपेन्द्रियजन्यत्वात्॥ इन्द्रियाऽप्रतीतावपित
थाप्रतीतेश्च॥ नापि चाक्षुषत्वादिजातिविषया॥ अननुगतत्वात्॥ पद्वा॥ जन्यधीजन्य
मात्रवृत्तिजातिरजन्यज्ञानवृत्तित्॥ भवति हि जन्यधीजन्यमात्रवृत्ति अनुमितित्वा
दि॥ तच्छून्यत्वं साक्षात्कारमात्रे॥ न च निदिध्यासनजन्यमात्रवृत्तिर्मोक्षजनक
तावच्छेदकजातिमति तत्त्वसाक्षात्कारेऽव्याप्तिः॥ मानसवृत्तित्वेन जातेर्विशेषणी
यत्वात्॥ मानसत्वं च जातिविशेष इत्यालं विस्तरः॥ नास्तिकास्तु॥ वैशिष्ट्यान राम० १

वगाहिज्ञानं साक्षात्कारः॥ अयं घट इत्यादिज्ञाने साक्षात्कारत्वप्रत्ययो भ्रान्तिः॥
घटत्वाद्यलीकविषयत्वादित्याहुः॥ तन्न॥ बाधकं विना भ्रान्तित्वायोगात्॥ न
चालीकविषयकत्वं बाधकं॥ घटत्वादेरलीकत्वासिद्धेः॥ स च साक्षात्कारो द्विविधः॥
नित्यो नित्यश्च॥ नित्यो भगवतः॥ अनित्योऽन्यः॥ अनित्यो द्विविधः॥ निर्वि
कल्पकः सविकल्पकश्चेति॥ तत्र वैशिष्ट्यानवगाहि ज्ञानं निराकारं वा ज्ञानं निर्वि नि५
कल्पकं॥ तच्च यद्यपि न प्रत्यक्षसिद्धं॥ अतीन्द्रियत्वाभ्युपगमात्॥ तथापि अ
यं घट इति विशिष्टज्ञानरूपकार्यानुमेयं॥ तथाहि॥ जन्यतद्विशिष्टज्ञानं प्रति
तद्विशेषणज्ञानं कारणमिति निर्विवादं भवति च बाधमिकमस्माकमयं घट
इति ज्ञानं जन्यघट त्व विशिष्टज्ञानमतस्तत्रापि घटत्वज्ञानं कारणं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न चैतदानीं घटत्वविशिष्टज्ञानमस्ति विशेषणाभूतघटत्वस्याज्ञानात्। अ
तो वैशिष्ट्यानवगाह्येव तद्वाच्यं॥ तदेव निर्विकल्पकं॥ न च जन्मांतरी
यं घटत्वविशिष्टज्ञानं तत्र कारणं॥ अव्यवहितपूर्वकालवर्तिन ए
व विशेषणज्ञानस्य तत्र हेतुत्वात्॥ न च भागवतं घटत्वज्ञानं तज्जनकं
॥ सामानाधिकरण्यप्रत्यासत्त्या तस्य हेतुत्वात्॥ भागवज्ञानस्य व्यधि
करणत्वात्॥ ननु घटत्वविशिष्टस्मरणमेव तत्र कारणं॥ न च विशेष
णज्ञानं विना कथं तदेव विशिष्टज्ञानमिति वाच्यं। विशिष्टानुभवे हि वि
शेषणज्ञानं कारणं न तु स्मरणेऽपि। तेन विना पि तदुत्पत्तेः॥ अन्यथा अ

राम॰
३

नवस्थानात्॥ अस्तु वा घटत्वस्मरणं निर्विकल्पकमिति चेन्न॥ चैत्रत्वा
दिविशिष्टबुद्धौ तदसंभवात्॥ न हि चैत्रत्वादिकं पूर्वमनुभूतं यत्तस्मा
रेत्॥ न चानुभवं विनैव स्मरणं॥ तस्य तद्धेतुत्वात्। किंच यत्र घटत्वं न
स्मृतं तत्र विशिष्टज्ञानसामग्र्यभावात्॥ घट घटत्वयोः साक्षात्का
रसामग्रीतः साक्षात्कारोत्पत्तौ न किंचिद्बाधकमस्ति तदेव चास्माकं निर्वि
कल्पकमिति संक्षेपः॥ ननु विशेषणज्ञानस्य हेतुता सिद्धौ सर्वमेतदेवं स्यात्॥ वं३
त्वेवमानं न पश्याम इति चेन्न॥ अन्वयव्यतिरेकाभ्यां तदवधारणात्
। विस्तरस्तु मणिमरीच्यादावनुसंधेयः॥ वैशिष्ट्यावगाहि सप्रकारकं बाह्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नसविकल्पक॥ प्रकारता चायं घट इत्यादिज्ञाने विशेषणा॥ स्य घटत्वादेर्विशेषणा॥ त्वापरना
मा विषयता विशेषः॥ विषयता च विषयाकारप्रतीतिसाक्षिकः स्वरूपसंबंधविशेषः॥ पदा
र्थांतरमित्येकदेशिनः॥ महास्तु॥ ज्ञातो घट इति प्रतीतेर्ज्ञानजन्यो विषयनिष्ठः प्राक
ट्यापरनामा पदार्थो ज्ञाततासैव ज्ञानविषयता॥ ज्ञानविषययोः संबंधः स्वरूपा॥ युक्तं
चैतत्॥ कथमन्यथा ज्ञानकर्मत्वं घटादेः क्रियाजन्यफलशालित्वाभावादिस्तु हु॥
तन्न। विनष्टे घटे ज्ञात इति प्रतीतेः॥ नहि तत्र ज्ञानं किंचिज्जनयितुं शक्नोति॥
तस्यैवासत्त्वात्॥ न च समवायिकारणं विनाभावकार्योत्पत्तिः संभवति॥ तत्र स्वरू
ति३ पसंबंधविशेष एव प्रतीतिविषय इति चेदन्यत्रापि स एवास्तु कृतं मध्यकेन। कर्मवि
भक्तेरपि तद्द्वेवोपपत्तेरिति संक्षेपः॥ अन्ये तु भासमानवैशिष्ट्यप्रतियोगि
त्वं प्रकारत्वं॥ अयं घट इत्यत्र हि घटत्वस्य वैशिष्ट्यं भासते तत्प्रतियोगी घट

राम. ४

त्वमित्याहुः॥ तन्न॥ दंडपुरुषसंयोगः इति समूहालंबने दंडी पुरुष इतिवत् दंडस्य
प्रकारत्वापत्तेः॥ संयोगो हि दंडस्य वैशिष्ट्यं भासते तत्प्रतियोगी च दंड इति दिक्॥ तच्च प्रत्य
क्षमिंद्रियात्मकं द्वेधा॥ द्रव्यग्राहकं तद्ग्राहकं च॥ द्रव्यग्राहकाणि चक्षुस्त्वङ्मनांसि॥
अन्यत् घ्राणरसनश्रवणं च॥ ननु मनसो द्रव्यग्राहकत्वे सति अंधस्यापि विप्रकृष्ट
घटोपलब्ध्यापत्तिः॥ न च तदात्ममात्रग्राहकं॥ सर्वविषयकत्वसिद्धांतव्याघाता
त्॥ उच्यते॥ मनः सर्वविषयकमपि बहिर्विषयकज्ञानजनने परतंत्रं॥ परं च चक्षुरा
दि॥ उपस्थितिर्योगजधर्मः॥ प्रत्यासत्त्या मनसा सर्वसाक्षात्काराच्च॥ मिपत्वादि
तत्सामान्यलक्षणा प्रत्यासत्त्या मनसा सर्वग्रहाच्च॥ क्व तर्हि मनः स्वतंत्रं॥ अबा
ह्यवस्तूनि॥ कान्यबाह्यानि आत्मा तद्योग्यगुणास्तदभावास्तद्वृत्तिजातिः स
मवायश्च॥ किं तद्योग्यगुणाः सविकल्पकज्ञानेच्छाप्रयत्नसुखदुःखद्वेषास्तदेक
[illegible]॥ [illegible]स्वरादिमात्रं॥ स्मृतपदार्थानां मनसा संसर्गो

(5)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वपरिमाणो च॥ तदेकत्वपरिमाणे योग्य इति टीकाकृतः॥ ननु इत्थं परात्मापरेणागध्य
तत्तद्गुणग्रहस्त्वन॥ परात्मतद्गुणानामयोग्यत्वात्॥ स्यादेतत्। चक्षुर्ग्राहि द्रव्यग्राह्ये
तद्गतपरमाणावादयोपि ग्रहणं स्यादिति चेन्न॥ तेषां चक्षुरयोग्यत्वात्। किंतु महत्त्वस्यो ६२
योग्यं महदुद्भूतरूपवद्द्रव्यं परमाणुस्तु न महान् आत्मा द्व्यणुकस्तु न रूपवन्तः पिशाचा
द्व्यणुकस्तु नोद्भूतरूपवतः तद्रूपस्यानुद्भूतत्वात् उद्भूतत्वं च जातिविशेष इत्येके॥ अनु
द्भूतत्वरूपजात्यभाव इत्यपरे॥ योग्यगुणाः योग्यद्रव्यगतरूपत्वमात्रवृत्तिसंख्या
परिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वस्नेहद्रवत्ववेगाः॥ मात्रपदं घटाका
शसंयोगवारणाय॥ कर्म्म च योग्यद्रव्यसमवेतं॥ जातिश्च योग्यवस्तुगता॥ द्र
व्यत्वरूपत्वादि समवायश्च॥ त्वचो महदुद्भूतरूपस्पर्शवद्योग्यं द्रव्यं॥ तेन परमा
णुवायुप्रदीपप्रभादयस्त्वचा न गृह्यन्ते परमाणोरमहत्त्वात्॥ वायोर्न
रूपत्वात्॥ प्रभायाश्च उद्भूतस्पर्शाभावात्॥ गुणास्तु रूपातिरिक्तास्त्वचो यो राम॰ ५

ग्या महदुद्भूतस्पर्शवन्मात्रवृत्तयो महदुद्भूतस्पर्शश्च अत एव वायुपरिमाणादय
स्त्वचा न गृह्यन्ते॥ चक्षुर्योग्यत्वात् न वा दीपप्रभापरिमाणादयः॥ उद्भूतस्प
र्शवद्वृत्तित्वात् न वा घटप्रभासंयोगादयः॥ उद्भूतस्पर्शवन्मात्रावृत्तित्वा
त्॥ न च हृदनुद्भूतस्पर्शे द्रव्यो वर्तंते॥ कर्म्म च योग्यद्रव्यसमवेतं सामान्यं च
योग्यवस्तुगतं॥ समवायश्च॥ मीमांसकास्तु॥ महदुद्भूतस्पर्शवद्द्रव्यत्वेनैव
त्वचो योग्यता लाघवात्॥ ननु महदुद्भूतरूपमपि तत्र प्रयोजकं॥ गौरवात्॥ अतो वायुरपि स्पार्श
नप्रत्यक्षः॥ न च बहिरिन्द्रियजन्यसाक्षात्कारत्वावच्छेदेनोद्भूतरूपस्य हेतुत्वात्॥ वायो
स्तदभावान्नोक्तमिति वाच्यं॥ लाघवात् द्रव्यचाक्षुषत्वावच्छेदेन तद्धेतुत्वादित्याहुः॥
वैशेषिकास्तु॥ समवायो न प्रत्यक्षः॥ संबंधप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतु
त्वात्॥ कथमन्यथा घटाकाशसंयोगोपि न प्रत्यक्षः॥ न च समवायस्य सर्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आश्रयाः प्रत्यक्षाः॥ परमाण्वादिरयोग्यत्वादित्याहुः॥ तन्न॥ तथाहे तुतायां मानाभा
वात्॥ नच घटाकाशसंयोगस्य प्रत्यक्षतापत्तिः॥ योग्यमात्रसमवेतगुणस्यैव योग्य
त्वात्। किंच लाघवात् संयोगप्रत्यक्षत्वावच्छेदेन यावदाश्रयप्रत्यक्षस्य हेतुता युज्य
ते॥ नतु संबंधप्रत्यक्षत्वावच्छेदेन॥ संबंधत्वं हि संयोगसमवायान्यतरत्वमिति
गौरवात्॥ घ्राणयोग्यो महत्त्वसमानाधिकरणोद्भूतो गंधः॥ तद्वृत्तं सामान्यं त
योः समवायश्च॥ अत एव परमाणुगंधो न गृह्यते॥ महत्त्वासमानाधिकरणत्वात्
॥ नवा मणिवज्रादिगंधोऽनुद्भूतत्वात्॥ रसनयोग्यो महत्त्वसमानाधिकरणोद्भूतो
रसः॥ तद्वृत्तं सामान्यं तयोः समवायश्च॥ तेन परमाणुरसो न गृह्यते॥ महत्वा
समानाधिकरणत्वात्॥ नवा सणपादिरसः॥ अनुद्भूतत्वात्॥ श्रवणयोग्यः शब्दः
तद्वृत्तजातिस्तयोः समवायश्चेति संक्षेपः॥ तस्य चेन्द्रियस्य सन्निकृष्टायोग्या राम: ६

हेतुत्वात् संनिकर्षाः सहकारिणः॥ के ते सन्निकर्षाः॥ संयोगः संयुक्तसमवायः
संयुक्तसमवेतसमवायः॥ समवेतसमवायः समवायो विशेषणताच॥ अथ केन सन्निकर्षेण
किं गृह्यते॥ द्रव्यं संयोगेन॥ शब्देतरगुणकर्मद्रव्यगतागताजातिः संयुक्तसमवायेन॥
भवति घटादि चक्षुरादिसंयुक्तं तत्र समवेतं रूपादिस्पर्शो जातिस्तु द्रव्यत्वादिः॥ शब्देतरगुण
कर्मगताजातिः संयुक्तसमवेतसमवायेन॥ भवति हि चक्षुरादिसंयुक्तं घ
टितत्समवेतं रूपादि तत्र समवायो रूपत्वादेः॥ शब्दः समवायेन॥ कर्णशष्कु
ल्यवच्छिन्नेनभसि तस्य समवायात्॥ शब्दगताजातिः समवेतसमवाये
न॥ श्रवणसमवेते शब्दे शब्दत्वादीनां समवायात्। विशेषणतया सम
वायोभावश्च॥ तत्र संयोगसमवाययोरभावे॥ सा च विशेषणता हि भावान्तर
विधा॥ इन्द्रियविशेषणता इन्द्रियसन्निकृष्टविशेषणता च॥ तत्रेन्द्रियवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शेषणात पाशब्दा भावो गृह्यते ॥ इन्द्रियरूपे अवर्णेन स्य विशेषणत्वात् ॥
इंद्रियसन्निकृष्टवि विशेषणतया भूतले घटाभावादि ॥ इंद्रियसन्नि
कृष्टे भूतले तस्य विशेषणत्वात् ॥ इंद्रियसन्निकृष्टविशेषणतापि बहुवि
धा ॥ सन्निकर्षस्य बहुत्वादेव सेयं ॥ ननु संयोगो न प्रत्यासत्तिः सं
युक्तसमवायेन घटादिग्रहसंभवात् ॥ इंद्रियसंयुक्ते कपालादौ
तेषां समवायात् ॥ मैवं ॥ आत्मनि तद्ग्रहसंभवात् ॥ तस्य समवे
तत्वात् ॥ इति संक्षेपः ॥ स्यादेतत् ॥ अंधकारस्थितघटादिकं मि
त्तिच क्षुषा नोपलभ्यते संयोगप्रत्यासत्तेः सत्वात् ॥ उच्यते ॥ च

दाम॰
७

क्षुषा द्रव्यग्रहे महदुद्भूतरूपालोकसंयोगः सहकारीति ॥ न चांधकारस्थे घटे सोऽस्ति ॥ न च मह
दुद्भूतेति व्यर्थं ॥ तेजः परमाणौ च चक्षुरादिसंयोगस्य विद्यमानत्वात् ॥ नन्वेवं चक्षुषा तेजः
प्रत्यक्षो न स्यात् ॥ तत्र तेजःसंयोगाभावात् ॥ प्रदीपे तत्प्रभासंयोगोऽस्तीति चेन्न ॥ मणिप्रभा
दौ तदभावात् ॥ दृश्यते च महांधकारे चंद्रकांतप्रभृतिमणिविशेषप्रभा ॥ अथालोके
तरद्रव्य चाक्षुषं प्रति आलोकसंयोगः सहकारीति चेन्न ॥ महांधकारे सुवर्णरूपते
जः साक्षात्कारापत्तेः ॥ अत्रोच्यते ॥ द्रव्यचाक्षुषमात्रे आलोकसंयोगो हेतुः ॥
न चालोकचाक्षुषे व्यभिचारः ॥ आलोकावयवसंयोगस्यालोकेपि सत्वा
त् ॥ तस्य द्विनिष्ठत्वात् ॥ न चैवमंधकारे सुवर्णसाक्षात्कारापत्तिः ॥ अनभिभू
तरूप आलोकसंयोगस्य हेतुत्वात् ॥ सुवर्णरूपं त्वभिभूतं ॥ अन्यथा सुवर्णरूप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकसंयोगाद्दृष्टांतरग्रहापत्तेः॥ संप्रदायविरुद्धस्तु॥ स्तुवर्णं भिन्नतेजो भिन्न
द्रव्यचात्सुषु ष्वालोकसंयोगो हेतुः॥ भवति च स्तुवर्णमपि स्वर्णं भिन्नं प
नेज स्तद्भिन्नमन स्तद्धेतुश्चालोकसंयोगो हेतुः तेनांधकारे न तत्साक्षा
त्कार इत्याहुः॥ तथापि पूर्वस्यां दिशि आलोकसंयोगवतः परस्यां तद
संयुक्तस्य स्थित्यादेः परदिगवच्छिन्नस्य पुरुषस्य साक्षात्कारः स्यात्॥ आ
लोकसंयोगस्य पूर्वदिगवच्छेदेन सत्वात्॥ मैवं त्त्~~वच्छेदेना्~~कारः स्यात्॥
~~रआलोकसंयोगस्य~~ यदवच्छेदेनालोकसंयोगस्तदवच्छिन्नश्च हेतुः
संयोगस्य हेतुत्वात्॥ इह च तदभावात्॥ स्यादेतत् विशेषणता

राम॰
८

सा

नर

नप्रत्यासत्तिः॥ समवायाभावयोरेवासत्वात्॥ नहि तयोरन्योन्यमस्ति॥ ननु अयं घटो
यंरूपवानयं पृथुचलनीति प्रत्यक्षमेव घटत्वरूपचलनत्वघविषयकं समवाये
माने। नहि घटादीनां तेषामन्यसंबंधोस्तीति चेन्न॥ स्वरूपसंबंधस्यैवाधाराधेयभा
वात्मकस्य सत्वात्॥ न हि समवाय एव घटाद्यस्याधारता॥ यया हि वापि सत्वात्॥
एकत्र वहि घटत्वपटत्वयोः समवायः॥ मैवं॥ घटे घटत्वे समवेते रूपे च समवेते
तंतुषु पटः समवेतः॥ इह कर्म्मिसमवेतमित्यनुगतसमवायाकारप्रतीत्या तत्सि
द्धेः॥ न चाभावो मन्न। घटो नास्तीति प्रतीत्या तत्सिद्धेः॥ अत्र प्राभाकराः॥
नाभावोधिकः। किंतु केवलाधिकरणस्वरूप एव॥ अतः किं इह मयं प्रत्या
सत्यंतरकल्पनेन॥ ननु किमिदं कैवल्यं॥ भूतलस्वरूपं चेत् सघटम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तलस्यापितत्वापत्तिः॥ घटाभावत्वं चेत् सिद्धमभावेनेति चेन्न॥ यत्राधिकरणे
भवन्निरभावोंगीक्रियते तत्तदधिकरणस्यैवाभावत्वांगीकारात्॥ नचाभे
दे आधाराधेयभावानुपपत्तिः॥ घटाभावे घटो नास्तीति प्रतीतेरभे
देपित्वया तथाभावांगीकारात्॥ नचाप्येवं घटाभावे घटाभावः॥ अ
नवस्थापत्तेः॥ अपसिद्धांताच्च॥ अत्रोच्यते॥ यदि भूतलविशेषो घ
टाभावस्तदा भूतले घटाभाव इत्याधाराधेयताप्रत्ययो न स्यात्॥ नहि भू
तले भूतलाधिकरणं भूतले भूतलमिति प्रतीत्यापत्तेः॥ किंच यत्रेदा
नीं घट आनीतस्तदधिकरणं घटाभावो न वा॥ आद्ये॥ इदानीं

राम

घटो नास्तीति प्रत्ययः स्यात्॥ अंत्ये॥ अन्यदापि घटो नास्तीति प्रत्ययाभावप्रसंगात्॥
किंच कपाले घटो भविष्यतीति घटो नष्ट इति प्रतीतिरस्ति॥ कपाले पूर्वं घटप्राग
भावः उत्तरकाले घटध्वंसः यदि कपालात्मा तदा सर्वदा तत्प्रतीतिः स्यात्कप
लस्य सत्वात्॥ अन्यथा कपालेपि प्रतीतिरपि न स्यात्॥ किंच मोक्षो दुःखाभावः॥
आत्मरूपः स्यात् तथा च साध्यतापत्तिर्नित्यत्वादिति संक्षेपः॥ स्यादेतत्॥ एवं घ
ती६ टाभावो नास्तीति प्रत्ययस्य घटाभावाभावोप्यधिकः स्यात्॥ स्यादेवेति चेत्॥
तर्हि तदभावोप्यधिकः स्यादित्यनवस्था॥ केवलाधिकरणं तदभाव इति॥
चेत्॥ तर्हि सर्वत्र स एवाभावोस्तु कृतमधिकेन भवदुक्तदूषणगणप्रसंग
स्यैवं स्यात्॥ आचार्याः॥ घटाभावाभावो घट एव॥ तस्मात्ते घटाभावो नास्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०

तिप्रतीतेः॥ नचकेवलाधिकरणस्य॥ उक्तयुक्तेरितिसंक्षेपः॥ नव्यास्तु॥
घटाभावाभावोधिकएव अभावत्वेनप्रतीतेः॥ नचायंभ्रमः॥ बाधकाभावात्॥
तदभावस्तु घटाभावएवनाधिकइतिनानवस्थानमित्याहुः। स्यादेतत्॥ भूतलघ
टभेदभिन्नेनवा॥ अन्त्ये॥ आद्यातभूतलमेवघटभेदद्रव्येन॥ आद्ये॥ तद्भेदो
प्यधिकस्यात्॥ स्यादेवेतिचेत्॥ तर्हि तद्भेदोप्यधिकः स्यादित्यनवस्था। अथ
अनवस्थाभियाभेदभेदोनाधिकः किंतु अधिकरणरूपइतिचेन्न॥ भवदु
क्तदूषणप्रसंगात्॥ अत्राहुः॥ भेदभेदोप्यधिकएव नचैवं तद्भेदोप्यधिकः
स्यादिष्टत्वात्॥ नचेयमनवस्थादोषायप्रामाणिकत्वात्॥ तदाहुः॥ सर्व
तोबलतीह्यन्यथानुपपत्तिरितिसंक्षेपः॥ सचायमभावोद्विधा। अन्यो

राम·
१०

८२

न्याभावःसंसर्गाभावश्च॥ तत्रेदमिदंनभवति॥ इदमेतद्भिन्नमितिप्रतीतिसाक्षिकोभावो
न्योन्याभावः। यदिमाहुः॥ तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकोभावोन्योन्या
भावः। तदन्योभावःसंसर्गाभावइति॥ सोपित्रिविधः॥ अत्यंताभावप्रागभाव
ध्वंसभेदात्॥ अत्रनासीदस्त्यनुभवसिद्धोनित्यःसंसर्गाभावोत्यंताभावः। विन
ष्टइतिप्रतीतिसाक्षिकउत्पत्तिमानभावोध्वंसः॥ सचनविनाशीतद्विनाश
कल्पनायांमानाभावात्॥ नहिविनाशोविनष्टइतिकश्चित्प्रत्येति। तत्प्रा
गभावश्च॥ घटादिरूपप्रतियोगीतस्यप्रागभावश्च॥ उभयत्रध्वंसोभवि
ष्यतीतिप्रत्ययात्। विनाश्यभावः॥ प्रागभावसचभविष्यतीत्यनुभवसा
क्षिकोदुरपह्नवः॥ तस्यचध्वंसःप्रतियोगीतदेव॥ सत्वं॥ उभयत्रविनष्टःप्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री वा० १

सिद्धान्तमञ्जरी
११

गभाव इति प्रतीतेः॥ अत्यंताभान्योन्याभावश्च नित्यो। नित्यश्चाभावो द्विविधः॥ एक
मात्रवृत्तिधर्मावच्छिन्नप्रतियोगिताको भावोन्यश्च॥ न चोत्पेमानाभावः॥ घट
वति घटपटौ न स्तः॥ घटो न घटपटौ॥ एकघटवति न घटौ इत्यकोनद्वाविति प्र
तीतेः रेकघटवति द्वित्वावच्छिन्नात्यंताभावस्यैकस्मिन्नुभपान्योन्या
भावस्य च सत्वात्। न च प्रतियोगिमति कथं तदभावसत्वो विरोधादिति वा
च्यं॥ प्रतियोगितावच्छेदकावच्छिन्ने नैवाभावस्य विरोधात्॥ न चैको द्वि
त्वावच्छिन्नएको द्वाविति प्रतीतेः॥ अत एकदेडिपुरुषाद्देपनीते पु
रुषे सत्यपि दडीपुरुषो नास्तीति॥ धीवलादिविशिष्टाभावो विशेषणा

श्री

रा० म०
११

वच्छिन्नविशेष्याभावरूपो न संभवति॥ न चेयं दण्डाभावविषया॥ दंडवत्यपि तथा
प्रतीतेः। न वा पुरुषाभावविषया तस्य सत्वात्॥ तस्माद्यत्र विशेषणाभा
वो विशेष्याभाव उभयाभावस्तत्र विशिष्टाभावो धिको वसेयः॥ भाट्टा
स्तु॥ अभावो नेंद्रियग्राह्यः। लोकसन्निकर्षाणामभावात्। किं त्वनुपलब्धि
रूपप्रमाणग्राह्य इत्याहुः। तन्न॥ प्रमाणांतरकल्पनातः सन्निकर्षांतरक
ल्पना पालघुत्वात्॥ अन्यथा संयोगादीनां प्रत्यक्षानां सन्निकर्षाणामभावा
त्॥ द्रोद्देपि। प्रमाणांतरकल्पनापत्तेः॥ तत्रमादं साक्षात्करोमीति प्रतीतेः॥
प्रत्यक्षत्वापत्तिरिति चेदिहापि परम्परासिद्धघटाभावमिति प्रतीतेरध्यक्ष
व सदृशतिल्य। किं चानुपलब्धेः प्रमाणान्तरत्वे व्यापारभावात्कथं प्रमाक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ भवति हि पृथिवीत्वं च स्वयोग्यतदनुपलब्धिश्च जलपरमाणौ। स्तो भेदग्रहानुपपत्तेः

रणत्वं व्यापारवद्धिकारणं करणमित्युक्तेः॥ ननु घटाभाववद्घटोपलब्धावपि घटाभावप्रत्यय
स्यात्॥ इन्द्रियसंबद्धविशेषणतायाः सत्वादिति चेन्न॥ योग्यानुपलब्धेरप्यभावग्रहे
हेतुत्वात्॥ अथ केयं योग्यानुपलब्धिः योग्यस्य प्रतियोगिनोऽनुपलब्धिः सहकारिणी
ति मतं॥ तन्न॥ जलपरमाणौ पृथिवीत्वाभावग्रहापत्तेः पिशाचस्य प्रतियोगिनो योग्य
त्वात्॥ अथ योग्ये धिकरणे प्रतियोगिनोऽनुपलब्धिः सेति चेन्न॥ भूतले पिशाचा
त्यंताभावग्रहापत्तेः॥ यत्र॥ अत्यंताभावप्रत्यक्षे योग्यप्रतियोग्यनुपलब्धि
रन्योन्याभावग्रहे च योग्याधिकरणे प्रतियोगितावच्छेदकानुपलब्धिः सहकारिणी
ति मतं॥ तन्न॥ जलपरमाणौ पृथिवीत्वात्यंताभावग्रहापत्तेः॥ वायावुद्भूतरूप
वद्भेदग्रहानापत्तेश्च॥ न चेष्टापत्तिः॥ अनुभवविरोधात्॥ अत्रोच्यते। यो

१२

ग्यसहकारिसंपन्नानुपलब्धिकारणं॥ अत एवांधाकारे न घटाभावग्रहस्तु
॥ तत्रालोकाधिकरणसन्निकर्षस्यापि हेतुत्वात्॥ न वा जलपरमाणौ पृथि
वीत्वाभावग्रहः योग्यसन्निकर्षाभावात्॥ कः सन्निकर्षो योग्यः पृथिवीत्वा
भावग्राहक इति चेत्॥ इंद्रियसन्निकृष्टमहदुद्भूतरूपवद्विशेषणता॥ उ
द्भूतरूपाभाववत्विंद्रियसन्निकृष्टमहत्ववद्विशेषणता योग्यः सन्निक
र्षः॥ अतो मनसि न तद्ग्रहः भवति च महति वायौ हवमत्रापि सन्नि
कर्षो योग्यः कार्यवशादुन्नेयः। पिशाचात्यंताभावस्तु अयोग्य
त्वादेव न गृह्यते॥ का पुनरत्यंताभावग्रहे योग्यता। योग्यमात्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सि०मं०म०
१२

प्रतियोगिकेयोग्यधर्मावच्छिन्नप्रतियोगिताकत्वंविशेषणं॥एवमन्यत्र अनुभवानुसारे
ण योग्यता वाच्या॥सर्वाभावस्याधारणे किं योग्यत्वमिति चेत्॥नकिंचिदिति महा
ण॥तत्किनानैवाभावयोग्यतेति चेत् ॥२०॥गुणयोग्यता वदनुगतत्वस्यैवतत्वा
दिति संक्षेपः॥ननु किमिदं चक्षुरादि॥तेज समिन्द्रियंरूपग्राहकं महदिंद्रियं
वाचक्षुः॥वायवीयमिन्द्रियंस्पर्शग्राहकं महदिंद्रियं वात्वक्॥ आप्यमिंद्रियं
रसग्राहकं महदिंद्रियं वा रसनं॥पार्थिवमिंद्रियं गंधग्राहकं महदिंद्रियं वाघ्रा
णं॥महत्त्वं दमनो वारणाय॥कर्णशष्कुल्यवच्छिन्नं नभःश्रोत्रं शब्दग्राहकं
महदिंद्रियं वाश्रोत्रं।निस्पर्शमणुमनः॥निस्पर्शपदं पार्थिवाद्यणुवारणा
य॥अणुपदं विभुवारणाय॥अत्रमीमांसकाः॥मनो नाणु।किंतु विभु नि
स्पर्शद्रव्यत्वात।आत्मवत्॥मनस्त्व आत्मान्यत्वे सति ज्ञानासमवायि

राम०
१३

कारणसंयोगाश्रयत्वमित्याहुः॥तन्न।विभुत्वे आत्मना संयोगानुपपत्तः॥
तथाहि।द्विविधः संयोगः॥कर्मजः॥अवयवसंयोगजश्च॥नचविभोरात्म
नः कर्मास्ति।मनोपि च यदि विभु तस्य कर्माभावात्कुतः कर्मज संयोगसंभवः॥
नचद्वयोरवयवोस्ति॥येन तत्संयोगज संयोगः स्यात्॥नचनित्य एव विभु
नोः संयोगः॥तत्संयोगनिषेधात्॥कुतो निषेध इति चेत्॥मानाभा
वात्संयोगत्वावच्छेदेन द्रव्यजन्यत्वावधारणाच्च॥॥अप्रयोजकं चेदमनु
मानमिति संक्षेपः॥ ॥इति श्रीमद्दाचार्य्यचूडामणिकृता या न्या
यसिद्धान्तमंजर्य्यां प्रत्यक्षपरिच्छेदः॥अथानुमानं निरूप्यते ॥॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं०म०-१४ तत्वानुमितिकरणमनुमानं॥ अनुमितित्वं चानुमिनोमीत्यनुभवसिद्धो जातिविशेषः॥ जन्यज्ञा
नजन्यत्वाव्यभिचारिजन्यशाब्दधीजन्यत्वव्यभिचारिजातिमदनुभवत्वं वा॥ प्रत्यक्षत्ववारणाय प
जन्यज्ञानजन्यत्वाव्यभिचारीति॥ ज्ञानजन्येनित्येनिर्विकल्पके च तद्वीजन्यत्वव्यभिरत्ति॥
तत्रापि प्रथमजन्यपदं चाक्षुषत्वादिवारणाय॥ तद्धीश्वरज्ञानजन्यत्वाव्यभिचारि॥ सर्वे
षां तद्दास्थ्यायामीश्वरधीजन्यत्वात्॥ उपमितित्वशाब्दत्ववारणाय व्यभिचारीत्यंतं॥
तद्भिन्नपर्यो क्ते ज्ञानजन्यत्वव्यभिचारि॥ उपमितीनां सर्वासां शब्दविषयकातिदे
शवाक्यार्थज्ञानजन्यत्वात्॥ शाब्दानुभवानां च सर्वेषां शाब्दज्ञानजन्यत्वात्॥
न च शब्दज्ञानजन्यत्वव्यभिचारी मिसधम्यक॥ अनुमितित्वस्यापि श्वरी
यशाब्दज्ञानजन्यत्वाव्यभिचारित्वेनासंभवात्॥ न च मोक्षोत्तनकज्ञाव
च्छेदकेतज्ञानवृत्तिसामान्यं जन्यज्ञानजन्यमाचवृत्तीत्यति व्याप्ति॥ राम १४

तस्य शाब्दविशेषविषयकमननजन्यमात्रवृत्तित्वेन जन्यशाब्दज्ञानजन्यत्वाव्यभिचारित्वा
त्॥ जातिपदं वा मानसावृत्तिपरं॥ अत एव भक्तिप्लुताद्रैर्युदासः॥ अनुभवपदस्म
तिवारणायेतिदिक्॥ ननु किमिदं तत्करणमिति चेत्॥ व्याप्तिविशिष्टपक्षधर्म
ताघटकलघुपदार्थमिति गृहाण॥ ननु केयं व्याप्तिः॥ न तावत्साध्यात्यंता
भाववदवृत्तित्वं पर्वतीयवह्न्यत्यंताभाववति महानसे धूमस्य सत्वात्॥ नापि सा
ध्यवदन्यावृत्तित्वं॥ वह्निमत्पर्वतान्यचत्वरवृत्तित्वाद्धूमस्य॥ अथ साध्यवत्वा
वच्छिन्नप्रतियोगिकान्योन्याभाववदवृत्तित्वं विवक्षितं॥ न च धूमवति म
तिवह्निमत्वावच्छिन्नान्योन्याभावो वर्तते॥ धूमवान् वह्निमानित्यप्रतीतेरिति चे
न्न॥ केवलान्वयिसाध्यकाव्याप्तेः॥ अत्र च मीमांसकाः॥ केवलान्वयिसाध्यक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सि॰ग्रं॰मं॰र॰ ॥१५

मनुमानमेवन ॥ क्वचित्तावदव्य(?)मवकाशः इत्याहुः ॥ तन्न ॥ इहमेयत्वमनुमिनो
मीत्यनुभवाय लापापत्तेः ॥ न चकारणाबाधाद्वोतिरियं ॥ व्यभिचारेण तद्बुद्धेः
कारणत्वासिद्धेः ॥ सोगतास्तु ॥ केवलान्वयिनि साध्यवदन्यत्वीकमेवास
त्वव्याप्तिसिद्धं तदवच्छिन्नत्वज्ञानादेवानुमितिरित्याहुः ॥ तन्न ॥ असत्ख्याते
रसिद्धेः ॥ किं चद्वेपत्वसाध्यके इत्थमपि अव्याप्तिर्दुर्वारा ॥ न ह्यलीकमद्वे
पं भवद्भिरिष्यते ॥ अन्ये तु ॥ कात्स्न्येन संबंधो व्याप्तिरित्याहुः ॥ तत्र वदंति
॥ कोयं कात्स्न्येन संबंधः ॥ कृत्स्नेन साध्ये न हेतोः संबंधः ॥ कृत्स्ने हेतौ सा
ध्यसामानाधिकरण्यं वा कृत्स्ने हेतुमति साध्यवत्त्वं वा ॥ नाद्यः ॥ प्रसि
द्धानुमानेव्याप्तेः ॥ न हि धूमे सकलवह्निसामानाधिकरण्यमस्ति ॥ अ

प्र॰म॰ १५

पःपिडीयवह्निसामानाधिकरण्याभावात् ॥ न द्वितीयः ॥ एकव्यक्तिहेतावव्याप्तेः ॥ न तृतीयः ॥ एकमात्रवृत्ति
हेतावव्याप्तेः ॥ अत्रोच्यते ॥ साध्यसमानाधिकरणत्वसमानाधिकरणयावत्कत्वं व्याप्तिः ॥ यत्समा
नाधिकरणा यावंतः साध्यसमानाधिकरणाः तत्त्वं व्याप्तिरितियावत् ॥ भवति च धूमसमानाधिकरणा
यावंतो वह्निसमानाधिकरणा इति धूमे वह्निव्याप्तिः ॥ न त्वेवं वह्नौ धूमस्य ॥ न हि वह्निसमानाधिकरणा
यावंतो धूमसमानाधिकरणाः ॥ अयःपिंडत्वस्य वह्निसमानाधिकरणस्य धूमासमानाधिकं
रणत्वात् ॥ यद्वा ॥ यद्विशिष्टसमानाधिकरणा यावंतः साध्यसमानाधिकरणास्तद्वत्त्वं तत् ॥ भव
ति च धूमत्वविशिष्टसमानाधिकरणाः यावंतो वह्निसमानाधिकरणास्तद्वत्त्वं च धूमे ॥ न चेह
शं धूमेप्यस्ति वह्नित्वेनातो वह्नौ धूमव्याप्तिः ॥ अस्ति चेदं केवलान्वयिनि ॥ अभिधेयत्वत्ववि
शिष्टसमानाधिकरणा नो यावंतो मेयत्वसमानाधिकरणा त्वात् ॥ एवं च लाघवात्साध्यवद
न्यावृत्तित्वे सति साध्यसमानाधिकरणत्वं व्याप्तिः ॥ न चेदं केवलान्वयिन्यस्ति ॥ अतो नेदम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सि॰मं॰ १६

नुमानमिति मीमांसकमतपास्तं॥ ततो प्यस्य लघुत्वात्॥ अत्र चार्वाकाः॥ भवत्विपं व्याप्तिः॥ न चे
पंशकाग्रहः। किंचिद्धूमसमानाधिकरणा वह्नि समानाधिकरणं भविष्यतीति शंकापाः दुर्वा
रत्वात्॥ न चेदृशो संकोपो व्याप्तिनिश्चयो भवितुमर्हति॥ तस्मात्तत्प्रतिबंधकत्वात्॥ न च भू
योदर्शनात्तन्निवृत्तिः॥ शतशः सहचरितयोरपि व्यभिचारोपलब्धेः॥ न च तर्कात्तन्निवृत्तिः॥ त
र्कस्य व्याप्तिनिश्चयमूलकत्वेनानवस्थानात्॥ इत्थं च व्याप्तिग्राहकाभावाद्व्याप्तिग्रहे कुतोनु
मानेस्यादिति॥ अत्रोच्यते॥ व्यभिचारज्ञानविरहादिकमेव व्याप्तिग्राहकं॥ न च तद्धेका
विरहो दुःशकः॥ क्वचित्तर्कात्क्वचित्तन्मूलभूतव्याप्त्यादौ कोटिस्मरणाद्यभावादपि तन्नि
वृत्तेः॥ न हि सर्वदा व्यभिचारशंकाकोटिस्मृतिर्वास्ति। अनुभूयते चेति दिक्॥ ननु सेपं व्याप्ति
र्दृष्टान्तवृत्तिधूमे गृहीता॥ न च पक्षीयेपि तथा च कथं तदनुमितिः॥ पक्षवृत्तिधूमे व्याप्तिग्र
हस्यानुमितिहेतुत्वादिति चेत्॥ अत्राहुः॥ उक्ता व्याप्तिर्दृष्टांत ■ वृत्तिहेतौ धूमत्वेनागृही

राम॰
१६

ता पर्वते धूमं दृष्ट्वा स्मर्यते॥ ततो विशेषणज्ञानरूपात्तस्मात्संनिकर्षाद्बाधके व्याप्तिविशिष्टत्वेन पक्षधर्मे धूम
ज्ञानं जायते॥ यद्वा॥ दृष्टान्ते व्याप्तिज्ञानं जायमानं धूमत्वरूपसामान्यलक्षणाप्रत्यासत्त्या सकलधू
मगोचरमेव जायत इत्यदोषः॥ ननु सामान्यं प्रत्यक्षप्रत्यासत्तिस्वरूपप्रत्यक्षजननीति दाविमुक्ति
नयनस्यापि धूमत्वेन सकलधूमसाक्षात्कारः स्यादिति चेन्न॥ यत्सामान्यं प्रत्यासत्तिः तत्प्रकारकत्वा
श्रयलौकिकसाक्षात्कारजनकसामग्र्या अपि सामान्यप्रत्यासत्तौ सहकारित्वात्॥ ननु व्याप्तिज्ञा

(हेतु)
नस्यानुमितित्वे पत्र धूमो वह्निव्याप्य इति ज्ञानं तत्राप्यनुमितिः स्यात्॥ न च पक्षवृत्तिधूमे व्याप्ति
ज्ञानं कारणं॥ तच्चात्र नास्तीति वाच्यं॥ धूमत्वेन सामान्यलक्षणाप्रत्यासत्तिभूतेन सर्वत्रैव धूमे व्या
प्तिज्ञानात्॥ न च हेतोः पक्षधर्मताज्ञानमपि सहकारीति वाच्यं॥ धूमो वह्निव्याप्यो ऽयं पर्वत
वृत्तीति ज्ञानादप्यनुमित्यापत्तेः॥ इत्थं त्वेन रूपेण पर्वते धूमज्ञानस्य सत्वात्॥ उच्यते॥ व्या
प्यत्वप्रकारेण पक्षे हेतुनिश्चयोऽनुमितिहेतुः॥ न तु व्याप्तिज्ञानमात्रं॥ न च धूमो वह्निव्याप्यो

सि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।सि॰मं॰ १७ इत्थंपर्वतस्थ नीति ज्ञानं व्याप्यत्वेन प[क्ष]धर्ममवगाहते।। येन तत्तोनुमितिः स्यात्।। पर्वतो वह्निव्याप्य धूमवान्नवेति संशयादनुमितिस्तोभ्रूदितिनिश्चयपरः।। मीमांसकास्तु।। व्याप्यतावच्छेदकप्र
कारकपक्षधर्मताज्ञानं व्याप्तिज्ञानेसहकारि।। व्याप्यतावच्छेदकं च धूमत्वं तद्रूपेण व्याप्ति
ग्राहात् न तु इत्थंत्वेनात्तो इत्थंपर्वतस्थ नीति ज्ञानादनुमितिः।। एवं च धूमो वह्निव्याप्योधू
मवान् पर्वत इति ज्ञानादप्यनुमितिरित्याहुः।। तन्न।। व्याप्यत्वप्रकारकपक्षधर्मताज्ञाने हे
तुतायां लघवात्।। किं च वह्निव्याप्यवानिति ज्ञानादनुमितिर्नस्यात्।। धूमत्वेनपक्षधर्म
तानवगाहनात्।। तस्माद्वह्निव्याप्यवानित्येवंरूपां व्याप्तिविशिष्टपक्षधर्मताज्ञानात्तृ ८७
तीयलिंगपरामर्शत्वेन प्रसिद्धादेवानुमितिः।। तृतीयत्वं कथमिति चेत्।। प्रथमं हृष्टान्तेधू
मदर्शनं ततो व्याप्तिज्ञानं तत स्तद्विशिष्टपक्षधर्मताज्ञानमित्येवं रूपेण त्रितिग्रहणं।।
तृतीयत्वं प्रापिकमितु तेन तुतेन रूपेण हेतुत्वं गौरवात्।। व्यभिचारश्चेति ध्येयं।। सोपं
परामर्शो नानुमितेः करणं।। व्यापाराभावात्।। नापि परामर्शरूपमानं लिंगपरामर्शो व्यापारकं।। रा॰म॰ १७

तं ४

३२

भूतभाविभ्यां लिंगाभ्यां अनुमित्युत्पादननापत्तेः।। अनन्यथासिद्ध नियतपूर्ववृत्ति हि करणं।।
किं तु व्याप्तिज्ञानं साध्यज्ञानं लिंगज्ञानं जन्यज्ञानं मात्रं वा परामर्शो व्यापारकं।। न चा
तिप्रसंगः।। व्यापारेण तन्निरासात्।। ज्ञानपदं च सविषयकमात्र परामर्शव्यापारकस्य क
रणत्वात्।। पूर्वानुभवत्ववात्तत्कारणमितिसंक्षेपः।। तच्चानुमानं त्रिविधं।। केवलान्व
यि केवलव्यतिरेकि अन्वयव्यतिरेकि भेदात्।। तत्र केवलान्वयि साध्यकमनुमानं
केवलान्वयि।। तत्र यो धर्मः सर्वत्र वर्तते स केवलान्वयी।। यथा अभिधेयत्वप्रमेय
त्वादि।। अभिधेयत्वं भगवदिच्छारूपशब्दशक्तिविषयत्वं तच्च सर्वत्रैव वर्तते।। सर्वस्यैव
भगवदिच्छाविषयत्वात्।। वस्तुपदशक्यत्वाच्च।। एवं ज्ञेयत्वं ज्ञानविषयत्वं तच्च सर्वत्रैवा
स्ति।। सर्वस्यैव भगवज्ज्ञानविषयत्वात्।। एवं प्रमेयत्वं प्रमाविषयत्वं।। तच्च सर्वत्रैव वर्तते।।
सर्वस्यैव भगवत्प्रमाविषयत्वात्।। अत्र केचित्।। यत्र साध्यनिरूपणं व्याप्तिस्तत्रानु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वि २

मितेरनुपत्तेः॥ पक्षतानुमितेरंग॥ सा च साध्यवत्वेन संदिह्यमानत्वं॥ न च प्रमेयत्वे न संशयो भैत्तुमर्हति॥ व्यतिरेककोटेरप्रसिद्धेः॥ अतः कथमिदमनुमानमिति॥ तन्न॥ सिषाधयिषाविरहविशिष्टसाध्यनिश्चयाभावो हि पक्षता॥ सा चेह हि प्यस्तिनतु संशयः॥ संशयं विनाप्यनुमितेरानुभविकत्वात्॥ साध्यनिश्चये सत्यपि ऋनुमित्सायां सत्यामनुमितेरुत्पत्तेः॥ तत्र पक्षतासंपत्तये विशिष्टांतं॥ तत्र सिषाधयिषासहितसाध्यनिश्चयोस्ति न तु तद्विरहविशिष्ट इति संक्षेपः॥ असत्सपक्षः केवलव्यतिरेकी॥ तत्वं च पक्षातिरिक्ते निश्चितसाध्यसाधनसहचारकत्वं॥ तथाहि॥ पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वात्॥ यन्नेतरेभ्यो भिद्यते तन्न पृथिवीपथा जलं नचेयं पृथिवी॥ तस्मादि

राम. १८

श्चपस्यैवत्तंद्वक्षेदे[illegible]निपक्षतावि रोधित्वात्॥ न चेह सोस्ति॥ सर्वत्र पृथिव्यांतन्निश्चयाभा॥४

तरेभ्यो भिद्यते॥ इति तिव्यरेकिणमुदाहरंति॥ न च पक्षातिरिक्ते न ता दृशसाध्यसाधनयोः साहचर्यमस्ति निश्चीयते वा न चा निश्चितसाध्यकत्वमेव सपक्षः॥ घटादौ साध्यस्येतरभेदस्य प्रत्यक्षत एव निश्चितत्वात्॥ अन्वयासाध्याप्रसिद्धौ तद्घटितव्याप्तिनिरूपणानापत्तेः॥ न च घटे साध्यनिश्चये तत्कपक्षत्वमिति वाच्यं॥ पृथिवीत्वावच्छेदेन साध्यनिर्वाहात्॥ अत्र व्यतिरेकसहचाराद्युक्ता व्याप्तिर्गृह्यत इति प्रांचः॥ साध्याभावहेत्वभावयोर्व्याप्तिग्रहादनुमितिः॥ न चान्यव्याप्तिग्रहात्कथमन्यानुमितिरतिप्रसंगादिति वाच्यं॥ साध्याभावव्यापकाभावप्रतियोगित्वेन पक्षधर्मतानिश्चयः साध्यानुमापक इत्यभ्यु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१५

पममाहित्यन्ये॥ उभयादन्योन्वयव्यतिरेकी॥ यथाप्रसिद्धानुमानमितिसंक्षेपः॥ ए
वं हेतूनभिहितेन तदाभासा निरूप्यन्ते॥ तत्र सव्यभिचारविरुद्धसत्प्रतिपक्षा
सिद्धबाधिताः पंच हेत्वाभासाः॥ सव्यभिचारस्त्रिविधः॥ साधारणोऽसा
धारणोऽनुपसंहारी॥ तत्र साधारणत्वं साध्यवदन्यवृत्तित्वं॥ यथा धूमवान्वह्नेरि
त्यत्र धूमवदन्यस्मिन्नयःपिंडे वह्निसत्वात्॥ साध्यासमानाधिकरणं
समनाधिकरणत्वं वा॥ भवति हि धूमासमानाधिकरणो धूमवदन्यत्वं तत्समानाधिकर
णो वह्निः॥ साध्यव्यापकीभूताभावप्रतियोगित्वमसाधारणत्वं॥ इदमेव सपक्ष
व्यावृत्तत्वं गायंति॥ उदाहरणं नित्यः शब्दः शब्दत्वादिति॥ शब्दत्वं हि नित्यत्वव्याप
कोयः शब्दत्वाभावस्तत्प्रतियोगी॥ न चानित्यः शब्दः शब्दत्वादित्यत्राव्याप्तिः॥
तस्य सहेतुत्वात्॥ एतज्ज्ञानं चानुमितौ साक्षात्प्रतिबंधकं॥ व्यतिरेकिणोऽस राम: १५

[illegible]तिपक्षरूपत्वात्॥ न चैवं सत्प्रतिपक्षत्वमिति वाच्यं॥ हेतुमेद एव तस्यांगीकारात्कथम
स्य व्यतिरेकिसत्प्रतिपक्षरूपतेति चेत्॥ कल्पः॥ शब्दत्वं हि नान्वयी हेतुः॥ क्वचि
दपि नित्ये शब्दत्वस्यादृष्टेः॥ किंतु व्यतिरेकी॥ तथा च नित्यत्वाभावव्यापकीयः शब्दत्वा
भावः तत्प्रतियोगित्वया साध्यं साधयेत्॥ तथा नित्यत्वव्यापकीभूता
भावप्रतियोगित्वया साध्याभावमपि साधयेत्॥ न च द्वयोर्विरुद्धयोरे
कत्र निर्णयः॥ किंतु परस्परप्रतिबंधकत्वात् द्वयोरेवानिर्णय इति बोध्यं॥ अ
वृत्तिसाध्यहेत्वन्यतरत्वे वृत्तिसाध्यकत्वं वाऽनुपसंहारित्वं॥ यथाकाशवा
न्धर्मादिप्रमेयत्वादौ॥ साध्यासमानाधिकरणत्वं विरुद्धत्वं॥ यथा गो
रश्वत्वादि॥ यद्यप्यत्राधमाधारणत्वमस्ति साधारणत्वं चास्ति
॥ तथाप्युपाधिभेदात् भेदः॥ पक्षेऽसाध्यधीप्रतिबंधकपरामर्शः
सत्प्रतिपक्षः॥ यथा जलमुष्णस्पर्शवत्त्वादित्यादौ नेदमुष्णं तेजस्त्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२० हित्यादि॥ असिद्धिस्तु व्यभिचाराद्यन्यपरामर्शप्रतिबंधकतावच्छेदकधर्मवत्वे
सा च त्रिविधा॥ स्वरूपासिद्धिराश्रयासिद्धिर्व्याप्यत्वासिद्धिश्च॥ पक्षे हेत्वभा
१० वः स्वरूपासिद्धिः॥ यथा घटः पृथिवी पटत्वादित्यत्र घटरूपपक्षे हेत्वभावः॥
पक्षे पक्षतावच्छेदकासिद्धिराश्रयासिद्धिः॥ यथा गगनकमलं सुरभिकमलत्वा
दित्यत्र पक्षे गगनीयत्वाभाव॥ एतदुभयभिन्नासिद्धिर्व्याप्यत्वासिद्धिः॥ यथा
धूलीपटले धूमनिष्ठव्याप्यत्वाभावः॥ साध्याप्रसिद्धिर्हेत्वप्रसि
द्धिर्वा॥ पक्षे साध्यशून्यत्वं बाधः॥ यथा जलपक्षे वह्न्यभावः॥ न चात्र धू
महेतोरसिद्धिरेवास्तीति स एव दोषोस्तीति कृतं बाधेनेति वाच्यं॥ असिद्धि
र्हि प॰ रामर्शप्रतिबंधकतया दोषः॥ तद्भयाच्च यत्र धर्मात्मकपरामर्शो
जातः॥ तत्र बाधे सत्यनुमितेरनुत्पत्तेर्बाधस्यानुमितिप्रतिबंधकतया दो राम २०

षत्वात्॥ आद्यकालावच्छिन्नो घटो रूपवान्पृथिवीत्वादित्यत्राद्यका
लावच्छेदेन घटे रूपाभावरूपबाधकस्थले दोषान्तराभावाच्च॥ नहि
पृथिवीत्वेन रूपव्याप्तिः पक्षे वृत्तित्वावृत्तित्वादिकं॥ ननूपाधिरपि हेत्वा
भासांतरसंभवतीति कथमेतन्न एवेति चेन्न॥ सव्यभिचाराद्यन्यत
मत्वं हि हेत्वाभासत्वं॥ न चोपाधिस्तदन्यतम इति तस्यानेवंभूतत्वात्॥
अतएव सिद्धसाधनमपि न हेत्वाभासान्तरं॥ ननु कोयमुपाधिः॥
तत्र च लक्षः॥ साध्यव्यापकत्वे सति साधनाव्यापकउपाधिः॥ त
व्यापकत्वं च तत्समानाधिकरणाभावतोपत्समानाधिकरणास्तत्वं॥
यथा धूमवान्वह्नेरित्यत्रार्द्रेन्धनं भवति हि तत्साध्यव्यापकं॥ ध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२१

मयुमानाधिकरणस्यपावतः तत्सम॰नाधिकरणत्वात्॥ भवतिच साधनाव्यापकं॥
वह्निमदयः पिंडेतदसत्वात्॥ सद्धेतौतु नैवं॥ तद्धेतोः साध्यव्याप्यत्वात्॥ साध्य
व्याप्याव्यापकस्यचसाध्याव्यापकत्वात्॥ अत्रवदंति॥ इदंसाधनावछि
न्नसाध्यव्यापकेऽव्याप्तं॥ यथाकाकः श्यामोमित्रातनयत्वात् इत्यत्रशा
कपाकजत्वं॥ नहिमत श्यामत्वव्यापकं श्यामत्ववति घटेऽसत्वात्॥
किंतुमित्रातनयत्वावछिन्नश्यामत्वव्यापकं॥ यत्रयत्रमित्रातनयत्वा
वछिन्नश्यामत्वंतत्रतत्रशाकपाकजत्वस्यसत्वात्॥ अथसाधनावछि
न्नसाध्यव्यापकत्वेसतिसाधनाव्यापकत्वमुपाधित्वंविवक्षितमिति
चेन्न॥ वायुःप्रत्यक्षः प्रमेयत्वादित्यादौ पक्षधर्मवहिर्द्रव्यत्वावछि
न्नसाध्यव्यापकेरूपवत्वादौउपाधावव्याप्तेः॥ नहिप्रमेयत्वरूपसाध।

मा.प.
२१

नावछिन्नसाध्यव्यापकंतत्॥ आत्मादावसत्वात्॥ किंतुवहिर्द्रव्य
त्वावछिन्नप्रत्यक्षत्वव्यापकं॥ यावतित्रुटिघटादौरूपसत्वात्॥
अथपक्षधर्मावछिन्नसाध्यव्यापकत्वेसतिसाधनाव्यापकत्वंविव
क्षितमितिचेन्न॥ यथोक्तेस्थले शाकपाकजत्वेऽव्याप्तेः॥ नहितत्पक्ष
धर्मावछिन्नश्यामत्वव्यापकं॥ तथाविधश्यामत्ववतिपक्षेऽसत्वात्॥
अथपक्षकिंचिद्धर्मावछिन्नसाध्यव्यापकत्वंविवक्षितं॥ सचधर्मः
क्वचित्साधनंक्वचित्पक्षधर्मइह इतिचेन्न॥ पर्वतोवह्निमान्धूमादि
त्यत्रमहानसत्वाभावस्योपाधितापत्तेः॥ भवतिचमहानसान्यत्व
रूपपक्षकिंचिद्धर्मावछिन्नवह्निव्यापकोमहानसत्वाभावः॥ पावं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्ताहशवह्निमतिसत्त्वात्॥ नच [illegible]म व्यापकः॥ धूमवतिमहानसेसत्त्वात्॥ अ
त्रोच्यते॥ स्वानधिकरणसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्या
पकत्वमुपाधित्वं॥ पक्षे॥ स्वावच्छिन्नानधिकरणसाधनाधिक
रणवृत्तिधर्मावच्छिन्नसाध्यव्यापकतावच्छेदकधर्मवत्त्वं त
त्॥ तत्र स्वावच्छिन्नानधिकरणहेतुमन्निष्ठप्रतियोगिताकधर्मा
वच्छिन्नसाध्याधिकरणवृत्तयोपावन्तोधर्माः पक्षधर्मावच्छिन्नस
मानाधिकरणाः स्तद्रूपत्वं॥ एवं तर्हि हि आर्द्रेन्धनत्वावच्छिन्नान
धिकरणवह्निमद्‌वृत्तिः पिण्डनिष्ठद्रव्यत्वाद्यवच्छिन्नं धूमाधिक

सा१

त्वा१

रणंपयन्निष्ठापावन्तोधर्माः आर्द्रेन्धनत्वावच्छिन्नसमानाधिकरणाः अतस्तद्वदार्द्रेन्ध
नं उपाधिः॥ एवं रूपत्वावच्छिन्नानधिकरणाप्रत्यक्षस्पर्शाश्रयत्वत्वनिष्ठबहिर्द्र
व्यत्वावच्छिन्नप्रत्यक्षत्वाधिकरणं पयन्निष्ठापावन्तोधर्माः रूपत्वावच्छिन्न
समानाधिकरणा अतो रूपवत्त्वमुपाधिः॥ एवं शाकपाकजत्वत्वावच्छि
न्नानधिकरणं पक्षमित्रातनयत्वव न्निष्ठमित्रातनयत्वावच्छिन्नश्यामत्वा
धिकरणं पयन्निष्ठापावन्तोधर्माः शाकपाकजत्वत्वावच्छिन्नसमानाधि
करणा अतः शाकपाकजत्वमुपाधिः॥ नचैवं सद्धेतोः सम्भवति॥ नहि
महानसत्वावच्छिन्नानधिकरणं पर्वतहेत्वधिकरणं महानसेतन्निष्ठध
र्मावच्छिन्नवह्न्यधिकरणमहानसादिनिष्ठापावन्तोधर्माः महानसत्वा
भावत्वावच्छिन्नसमानाधिकरणाः॥ महानसत्वस्याभावात्॥ अत एव सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राम.
२२

२२

(23)

द्वेतोपद्धेतरत्वेनोपाधिः॥ पद मात्रवृत्तिधर्मोमत्सामान्योऽधिकरण्या
भावादित्तिसद्धेपः॥ तच्चानुमानंपरार्थंन्यायपूर्वकं॥ न्यायश्चक्रमि
१३ कप्रतिज्ञादिपंचकसमुदायः॥ यथा पर्वतो वह्निमान् धूमात् यो यो
धूमवान् स सोऽग्निमान्॥ वह्निव्याप्यधूमवानयं॥ तस्माद्धूमा॰नि
ति॥ तत्रैतन्न्यायघटकपर्वतो वह्निमानिति शब्दवृत्त्यवयववि
23 भाजकोपाधिमत्त्वं प्रतिज्ञात्वं॥ एतद्धूमादिति शब्दवृत्तिताद
शोपाधिमत्त्वं हेतुत्वं॥ एतद्यो यो धूमवान् सोऽग्निमानिति श
ब्दवृत्तितादृशोपाधिमत्त्वमुदाहरणमत्त्वं॥ एतद्वह्निव्याप्य
धूमवानयमिति शब्दवृत्तितादृशोपाधिमत्त्वमुपनयत्वं॥ राम
२२

एतस्माद्वह्निमानितिशब्दवृत्तितादृशोपाधिमत्त्वंनिगमनत्वं॥
अवयवत्वं प्रतिज्ञाद्यन्यतमत्वं॥ उक्तंच॥ अवयवाः पंच प्र
तिज्ञादिभेदादिति॥ ॥इति श्रीमद्भट्टाचार्यचूडामणिविर
चितायां सिद्धांतमंजर्यां अनुमानपरिच्छेदः॥ अथोप मा
निरूप्यते॥ तत्रोपमितिकरणमुपमानं॥ उपमितित्वंचउपमि
नोमीत्यनुभवसिद्धोजातिविशेषः शब्दविषयकत्वाव्यभिचा
रिजातिमत्त्वं वा॥ अनुमित्यादिवारणाय जातिमद
न्तं॥ अनुमितित्वादीनां वह्निमानितिज्ञाने शब्दविषयकत्वव्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिचारित्वात्॥ स्वावा च वारणाय पक्षे स्पपदं प्रत्यक्षोन्यपरं॥ वि२
२४ नुनूपमितित्वमेवक पशब्दं षपकत्वाव्यभिचारि इति चेन्न॥
उच्यते॥ उपमितिर्हि पदवाच्यविषयिका॥ न च पदमविषयीकृ
त्य तद्वाच्यत्वं विषयीकर्तुमर्हति॥ परं पंच शब्दात्मकमित्युपमितेः
२५ शब्दविषयकत्वनियमः॥ कुत इयमुत्पद्यते इति चेन्न॥ सादृश्यज्ञानादिति
गृहाण॥ तथा हि॥ सामान्यतो गवयपदवाच्यं किंचिदस्तीति जानन्विशिष्या
परिचिन्वानः कीदृशो गवयपदवाच्य इति॥ केचित्पृच्छति तेन गोस
दृशो गवयपदवाच्यः इत्युक्तः विपिनमनुसरन्यदा गोसदृशं पिंडमनु
नुभवति तदा पूर्वानुभूततादृगतिदेशवाक्यार्थस्मरण्यतिरिच्छिन्न राम
ति॥ अयं गवयपदवाच्य इति सेयमुपमितिर्लोके॥ न च तेन तस्य २५

त्पद्ये॥ चक्षुरादिव्यापारविगमेपिजायमानत्वात्॥ न च मानसं॥ ततो विलक्षणा
त्पानुभूयमानत्वात्॥ अन्यथानुमितेरपि मानसत्वापत्तेः॥ नाप्यनुमि
तिर्व्याप्तिज्ञानाद्यभावेप्युत्पत्तेः॥ नापि शाब्दं॥ गवयत्वविशिष्टस्योप
स्थापकपदाभावात्॥ उपमितावयं गवयपवाच्य इत्याकारिकायां गवयत्वा
वच्छेदेन गवयपदवाच्यत्वावगाहनात्॥ ननु गोसादृश्यावच्छेदेन॥
तस्यां गौरवेणावच्छेदकत्वात्॥ अन्यथा प्रतीतिमूलभूतव्यवहारप्र
संगः॥ न वास्मन्नीतिरियं॥ एवमननुभवात्॥ अतोतिरिक्तैवेयं तस्याः क
रणं सादृश्यविशिष्टे तत्पदवाच्यत्वरूपवाक्यार्थानुभवस्तत्स्मृतिर्द्वा
रं गवयपदादि रूपावच्छेदकविशिष्टसादृश्यज्ञानं तावत्सहकारीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वेद्दाप:॥ तत्त्वोपलक्षणं॥ वैधर्म्ये ज्ञानादप्युपमितुत्पत्ते:॥ यथाकीदृशी पृथिवीति शिष्येण पृष्टे जलादिवैधर्म्यं गुणवत्त्री पृथिवीति गुरुणोक्तेरितः सन्॥ यदा जलादि वैधर्म्यं गुणवतीमिति समनुभवति तदा तच्छब्दार्थ स्मरणाहस्योपमितिरूपन्नय द्यते॥ इयं पृथिवीपदवाच्येति॥ एवं गंधवती पृथिवी सूत्रेपि ज्ञेयं॥ तस्माद्यत्किंचिद्धर्मविशिष्टे विशिष्याविहितसंगतिकपदवाच्यता रूपवाक्यार्थानुभवः करणं॥ किंचिद्धर्मविशिष्टे तदनाधीसत्तन्हकारिणी॥ यदा च सत्यपि लघुधर्मे तद्रस्कृत्येण गुरुधर्मविशिष्ट एव समदृश्यादिकं ज्ञानं जायते तदा नदवच्छेदेनैव वाच्यताग्रहो जायते परं तुसम्प्रे पौरवेणबाधादिति संक्षेप:॥ इतिश्रीमहाचार्यचक्रमणि

२५

राम.
२५

KKSU LIBRARY
RAMTEK
441 106
M-1219
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.10.20 14:21
,TRANSFERRED=2020/10/22 at 14:24:32
,PAGES=26
,TYPE=STD
,NAME=S0004394
,Book Name=M-1219-NYAY SIDHOTMANJARI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection